# सुन्दरकाण्ड अष्टचत्वारिंशः सर्गः (४८) - हनुमद्बन्धनम्

ततः स रक्षोऽधिपतिर् महात्मा
हनूमताऽक्षे निहते कुमारे ।
मनः समाधाय तदेन्द्र कल्पं
समादि देशेन्द्रजितं सरोषात् ॥ १ ॥

त्वमस्त्रविच् छस्त्र विदां वरिष्ठः
सुरासुराणा मपि शोक दाता ।
सुरेषु सेन्द्रेषु च दृष्ट कर्मा
पिता महाराधन सञ्चितास्त्रः ॥ २ ॥

तवास्त्र बलमासाद्य नासुरा न मरुद्गणाः ।
न शेकुः समरे स्थातुं सुरेश्वर समाश्रिताः ॥ ३ ॥

न कश्चित् त्रिषु लोकेषु सम्युगे न गत श्रमः ।
भुज वीर्याभि गुप्तश्च तपसा चाभिरक्षितः ।
देशकाल विभागज्ञस् त्वमेव मतिसत्तमः ॥ ४ ॥

न तेऽस्त्य शक्यं समरेषु कर्मणा
न तेऽस्त्य कार्यं मतिपूर्व मन्त्रणे ।

न सोऽस्ति कश्चित् त्रिषु सङ्ग्रहेषु वै
न वेद यस्तेऽस्त्रबलं बलं च ते ॥ ५ ॥

ममानु रूपं तपसो बलं च ते
पराक्रमश् चास्त्र बलं च सम्युगे ।
न त्वां समासाद्य रणावमर्दे
मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥

निहताः किङ्कराः सर्वे जम्बुमाली च राक्षसः ।
अमात्य पुत्रा वीराश्च पञ्च सेनाग्र यायिनः ॥ ७ ॥

बलानि सुसमृद्धानि साश्व नाग रथानि च ।
सहोदरस्ते दयितः कुमारोऽक्षश्च सूदितः ।
न हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन ॥ ८ ॥

इदं हि दृष्ट्वा मतिमन् महद्बलं
कपेः प्रभावं च पराक्रमं च ।
त्वमात्मनश् चापि समीक्ष्य सारं
कुरुष्व वेगं स्वबलानु रूपम् ॥ ९ ॥

बलाव मर्दस् त्वयि सन्निकृष्टे
यथागते शाम्यति शान्त शत्रौ ।
तथा समीक्ष्यात्म बलं परं च
समारभस् वास्त्र विदां वरिष्ठ ॥ १० ॥

न वीर सेना गण शोच्यवन्ति
न वज्रमादाय विशाल सारम् ।
न मारुतस् यास्य गतेः प्रमाणं
न चाग्नि कल्पः करणेन हन्तुम् ॥ ११ ॥

तमेव मर्थं प्रसमीक्ष्य सम्यक्
स्वकर्म साम्याद्धि समा हितात्मा ।
स्मरंश्च दिव्यं धनुषोऽस्त्र वीर्यं
व्रजाक्षतं कर्म समारभस्व ॥ १२ ॥

न खल्वियं मतिः श्रेष्ठा यत्त्वां सम्प्रेषयाम्यहम् ।
इयं च राज धर्माणां क्षत्रस्य च मतिर्मता ॥ १३ ॥

नाना शस्त्रैश्च सङ्ग्रामे वैशारद्य मरिन्दम ।
अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ १४ ॥

ततः पितुस्तद् वचनं निशम्य
प्रदक्षिणं दक्ष सुत प्रभावः ।
चकार भर्तार मदीनसत्त्वो
रणाय वीरः प्रतिपन्न बुद्धिः ॥ १५ ॥

ततस्तैः स्वगणै रिष्टै रिन्द्रजित् प्रतिपूजितः ।
यद्धोद्धतः कृतोत्साहः सङ्ग्रामं प्रत्यपद्यत ॥ १६ ॥

श्रीमान् पद्म पलाशाक्षो राक्षसाधिपतेः सुतः ।
निर्जगाम महातेजाः समुद्र इव पर्वसु ॥ १७ ॥

स पक्षि राजोपम तुल्य वेगैः
व्यालैश् चतुर्भिः सित तीक्ष्ण दंष्ट्रैः ।
रथं समायुक्त मसङ्ग वेगं
समा रुरोहेन्द्र जिदिन्द्र कल्पः ॥ १८ ॥

स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्र विदां वरः ।
रथेनाभि ययौ क्षिप्रं हनूमान् यत्र सोऽभवत् ॥ १९ ॥

स तस्य रथ निर्घोषं ज्यास्वनं कार्मुकस्य च ।
निशम्य हरिवीरोऽसौ सम्प्रहृष्ट तरोऽभवत् ॥ २० ॥

सुमहच्चाप मादाय शित शल्यांश्च सायकान् ।
हनुमन्त मभिप्रेत्य जगाम रण पण्डितः ॥ २१ ॥

तस्मिंस् ततः सम्यति जात हर्षे
रणाय निर्गच्छति बाण पाणौ ।
दिशश्च सर्वाः कलुषा बभूवुः
मृगाश्च रौद्रा बहुधा विनेदुः ॥ २२ ॥

समागतास् तत्र तु नागयक्षा
महर्षयश् चक्र चराश्च सिद्धाः ।
नभः समावृत्य च पक्षि सङ्घा
विनेदुरुच्चैः परम प्रहृष्टाः ॥ २३ ॥

आयान्तं सरथं दृष्ट्वा तूर्ण मिन्द्रिजितं कपिः ।
विननाद महानादं व्यवर्धत च वेगवान् ॥ २४ ॥

इन्द्रजित्तु रथं दिव्य मास्थितश् चित्र कार्मुकः ।
धनुर् विस्फारयामास तटिदूर्जित निःस्वनम् ॥ २५ ॥

ततः समेता वति तीक्ष्णवेगौ
महाबलौ तौ रण निर्विशङ्कौ ।
कपिश्च रक्षोऽधि पतेश्च पुत्रः
सुरा सुरेन्द्राविव बद्ध वैरौ ॥ २६ ॥

स तस्य वीरस्य महारथस्य
धनुष्मतः सम्यति संमतस्य ।
शर प्रवेगं व्यहनत् प्रवृद्धः
चचार मार्गे पितु रप्रमेये ॥ २७ ॥

ततः शरानायत तीक्ष्ण शल्यान्
सुपत्रिणः काञ्चन चित्र पुङ्खान् ।
मुमोच वीरः परवीर हन्ता
सुनन्नतान् वज्र निपात वेगान् ॥ २८ ॥

तत्स्तु तत्स्यन्दन निःस्वनं च
मृदङ्ग भेरी पटहस्वनं च ।
विकृष्यमाणस्य च कार्मुकस्य
निशम्य घोषं पुनरुत् पपात ॥ २९ ॥

शराणा मन्तरेष्वाशु व्यवर्तत महाकपिः ।
हरिस् तस्याभि लक्ष्यस्य मोघयँल्लक्ष्य सङ्ग्रहम् ॥ ३० ॥

शराणा मग्रतस् तस्य पुनः समभि वर्तत ।
प्रसार्य हस्तौ हनुमा नुत्पपाता निलात्मजः ॥ ३१ ॥

तावुभौ वेग सम्पन्नौ रणकर्म विशारदौ ।
सर्वभूत मनोग्राहि चक्रतुर् युद्ध मुत्तमम् ॥ ३२ ॥

हनूमतो वेद न राक्षसोन्तरं
न मारुतिस् तस्य महात्मनोन्तरम् ।
परस्परं निर्विषहौ बभूवतुः
समेत्य तौ देव समान विक्रमौ ॥ ३३ ॥

ततस्तु लक्ष्ये स विहन्यमाने
शरेष्व मोघेषु च सम्पतत्सु ।
जगाम चिन्तां महतीं महात्मा
समाधि सम्योग समाहितात्मा ॥ ३४ ॥

ततो मतिं राक्षस राजसूनुः
चकार तस्मिन् हरिवीर मुख्ये ।
अवध्यतां तस्य कपेः समीक्ष्य
कथं निगच्छेदिति निग्रहार्थम् ॥ ३५ ॥

ततः पैतामहं वीरः सोऽस्त्र मस्त्रविदां वरः ।
सन्दधे सुमहा तेजास् तं हरि प्रवरं प्रति ॥ ३६ ॥

अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्र तत्त्व वित् ।
निजग्राह महा बाहुर् मारुतात्मज मिन्द्रजित् ॥ ३७ ॥

तेन बद्धस् ततोऽस्त्रेण राक्षसेन स वानरः ।
अभवन् निर्विचेष्टश्च पपात स महीतले ॥ ३८ ॥

ततोऽथ बुद्ध्वा स तदस्त्र बन्धं
प्रभोः प्रभावाद् विगतात्म वेगः ।
पितामहानुग्रह मात्मनश्च
विचिन्तयामास हरि प्रवीरः ॥ ३९ ॥

ततः स्वायम्भुवैर् मन्त्रैर् ब्रह्मास्त्र मभिमन्त्रितम् ।
हनूमांश् चिन्तयामास वरदानं पितामहात् ॥ ४० ॥

न मेऽस्य बन्धस्य च शक्तिरस्ति
विमोक्षणे लोक गुरोः प्रभावात् ।
इत्येव मत्वा विहितोऽस्त्रबन्धो
मयात्म योने रनुवर्तितव्यः ॥ ४१ ॥

स वीर्यमस्त्रस्य कपिर् विचार्य
पितामहानुग्रहमात्मनश्च ।

विमोक्षशक्तिं परिचिन्तयित्वा
पितामहाज्ञा मनुवर्तते स्म ॥ ४२ ॥

अस्त्रेणापि हि बद्धस्य भयं मम न जायते ।
पितामह महेन्द्राभ्यां रक्षितस् यानिलेन च ॥ ४३ ॥

ग्रहणे चापि रक्षोभिर् महान्मे गुणदर्शनः ।
राक्षसेन्द्रेण संवादस् तस्माद् गृह्णन्तु मां परे ॥ ४४ ॥

स निश्चितार्थः परवीर हन्ता
समीक्ष्यकारी विनिवृत्त चेष्टः ।
परैः प्रसह्याभि गतैर् निगृह्य
ननाद तैस्तैः परिभर्त्स्यमानः ॥ ४५ ॥

ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिन्दमम् ।
बबन्धुः शण वल्कैश्च द्रुमचीरैश्च संहतैः ॥ ४६ ॥

स रोचयामास परैश्च बन्धं
प्रसह्य वीरै रभिनिग्रहं च ।
कौतूहलान्मां यदि राक्षसेन्द्रो
द्रष्टुं व्यवस्ये दिति निश्चितार्थः ॥ ४७ ॥

स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान् ।
अस्त्र बन्धः स चान्यं हि न बन्ध मनुवर्तते ॥ ४८ ॥

अथेन्द्रजित् तु द्रुम चीर बद्धं
विचार्य वीरः कपि सत्तमं तम् ।
विमुक्त मस्त्रेण जगाम चिन्तां
नान्येन बद्धो ह्यनुवर्ततेऽस्त्रम् ॥ ४९ ॥

अहो महत् कर्म कृतं निरर्थकं
न राक्षसैर् मन्त्रगतिर् विमृष्टा ।
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्
प्रवर्तते संशयिताः स्म सर्वे ॥ ५० ॥

अस्त्रेण हनुमान् मुक्तो नात्मान मवबुध्यत ।
कृष्यमाणस्तु रक्षोभिस् तैश्च बन्धैर् निपीडितः ॥ ५१ ॥

हन्यमानस् ततः क्रूरै राक्षसैः काष्ठ मुष्टिभिः ।
समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः ॥ ५२ ॥

अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तम्
अस्त्रेण बद्धं द्रुम चीर सूत्रैः ।
व्यदर्शयत् तत्र महाबलं तं
हरि प्रवीरं सगणाय राज्ञे ॥ ५३ ॥

तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् ।
राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५४ ॥

कोऽयं कस्य कुतो वाऽत्र किं कार्यं को व्यपाश्रयः ।
इति राक्षस वीराणां तत्र सञ्जज्ञिरे कथाः ॥ ५५ ॥

हन्यतां दह्यतां वापि भक्ष्यतामिति चापरे ।
राक्षसास् तत्र सङ्क्रुद्धाः परस्पर मथाब्रुवन् ॥ ५६ ॥

अतीत्य मार्गं सहसा महात्मा
स तत्र रक्षोऽधिप पादमूले ।
ददर्श राज्ञः परिचार वृद्धान्
गृहं महारत्न विभूषितं च ॥ ५७ ॥

स ददर्श महातेजा रावणः कपिसत्तमम् ।
रक्षोभिर् विकृताकारैः कृष्यमाण मितस्ततः ॥ ५८ ॥

राक्षसाधिपतिं चापि ददर्श कपि सत्तमः ।
तेजोबल समायुक्तं तपन्तमिव भास्करम् ॥ ५९ ॥

स रोष संवर्तित ताम्र दृष्टिः
दशाननस् तं कपिमन्व वेक्ष्य ।
अथोप विष्टान् कुल शीलवृद्धान्
समादिशत्तं प्रति मन्त्रि मुख्यान् ॥ ६० ॥

यथा क्रमं तैः स कपिर् विपृष्टः
कार्यार्थ मर्थस्य च मूलमादौ ।
निवेदयामास हरीश्वरस्य
दूतः सकाशा दह मागतोऽस्मि ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥